श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सुदर्शनषट्कम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सुदर्शनषट्कम् ॥

सहस्रादित्यसङ्काशं सहस्रवदनं प्रभुम्।
सहस्रदं सहस्रारं प्रपद्येऽहं सुदर्शनम्॥ **1** ॥

हसन्तं हारकेयूर मुकुटाङ्गदभूषणम्।
भूषणैर्भूषिततनुं प्रपद्येऽहं सुदर्शनम्॥ **2** ॥

स्राकारसहितं मन्त्रं पठन्तं शत्रुनिग्रहम्।
सर्वरोगप्रशमनं प्रपद्येऽहं सुदर्शनम्॥ **3** ॥

रणत्किङ्किणिजालेन राक्षसघ्नं महाद्भुतम्।
व्याप्तकेशं विरूपाक्षं प्रपद्येऽहं सुदर्शनम्॥ **4** ॥

हुंकारभैरवं भीमं प्रणतार्तिहरं प्रभुम्।
सर्वपापप्रशमनं प्रपद्येऽहं सुदर्शनम्॥ **5** ॥

फट्कारान्तमनिर्देश्यं महामन्त्रेण संयुतम्।
शुभं प्रसन्नवदनं प्रपद्येऽहं सुदर्शनम्॥ **6** ॥

एतैष्षड्भिस्स्तुतो देवो भगवान् श्रीसुदर्शनः।
रक्षां करोति सर्वात्मा सर्वत्र विजयी भवेत्॥ **7** ॥

॥ श्री सुदर्शनषट्कं समाप्तम् ॥